स्याद्द्वेष्टारः सर्व एव ते”। नैकृतिकः परापकारशीलः। चाक्रिकस्तैलिकः। प्रमत्तः सदाऽनवहितः। महापथिको महापथगामी। सामुद्रो वाणिज्यवहित्रवाही। एकः श्रोत्रियो द्वयोरननुमतः। एकः, श्रोत्रिय इति पृथग्वा प्रायश्चोक्तं च प्रागेव तत्। अपरार्केण तु युग्मकेति पठित्वा युग्मौ द्वाविति व्याख्यातम्। एकस्थालीसहाय एकपाकभोजीति। सहाय्यन्यतरसाहाय्यकारी, मिश्रचण्डेश्वरौ। मदनरत्नाकरस्तु एकस्थालीः सहाय इति विशेषणद्वयं पृथक्कृत्य एकस्थाली स्थाल्यधिकरणकः पाकोऽलक्ष्यते। स एको यस्येत्येकस्थालीति व्याचख्यौ। समासान्तविधेरनित्यत्वादेकस्थालीत्यत्र “नद्यृतश्चेति” पा० न कप्। अर्द्धपिप्पलीत्यादिवन्न ह्रस्व इति च समादधे। अरिचरः भूतपूर्वः शत्रुः। भूतपूर्वे चरट्। कल्पतरौ त्वस्त्रधर इति पठित्वा शस्त्रधर इति व्याख्यातम्। ज्ञातयः सगोत्राः सनाभयो मातुलतत्सुतमातृष्वस्रियादयः। शैलूषः स्त्रीणां नर्तयिता। कुशीलवस्तु रङ्गोपजीवी नट इति भेदः। विषजीवी विषक्रयजीवीति मदनरत्ने। विषवद्योपजीवीति रत्नाकरे। अहितुण्डिकः सर्पक्रीडोपजीवी व्यालग्राही। कीनाशः कर्कशः क्षुद्रो वा। कृपण इति तु मदनरत्ने। उपपातिन उपपातकीति कल्पतरुः। मदनरत्ने तूपपातक इति पठितम्। उप समीपं पातकं यस्येति विग्रहश्च पातकयुक्त इति व्याख्यातञ्च। क्लान्तोऽतिखिन्नः श्रान्तोऽनवरतकर्मकारीति मदनरत्ने। अशान्त इति पठित्वाऽयोग्यकर्मकारीति रत्नाकरे। निर्धूनो बान्धवैस्त्यक्त इति मदनरत्ने। ग्रामराजकुलश्रेण्यादिभिर्निःसारित इति रत्नाकरे। मूलिकः लोकभयशून्य इति भवदेवः। मूलं विप्रलम्भस्तत्कारीति तु युक्तम्। अपरार्केण तु पौपिक इति पठित्वा पौपिकः पूपादिविक्रयीति व्याकृतम्। वर्षसूचको वर्षशकुनवेदी। नक्षत्रसूचको ज्यौतिषिकः। अघशंसी परकीयपापप्रकाशकः। हीनाङ्ग उचितपरिमाणान्यूनाङ्गः। व्यङ्गस्तु छिन्नाङ्गुल्यादिरिति भेदः। भगवृत्तिर्भार्यादास्यादिसम्भोगशुल्कोपजीवी शरड्डी वृषभनर्त्तनजीवीति मदनरत्नरत्नाकरयोः। कुहको दाम्भिकः। प्रत्यवसितः प्रव्रज्यादिच्युतः। कुलिको राज्ञा व्यवहारपरिच्छेदकतया नियुक्तः। अस्य च साक्षित्वकरणे निषेधो, विधिस्तु कृतसाक्ष्य इति कल्पतरुः। मदनरत्ने तु कुलं ब्राह्मणादिगणस्तदधिकारी कुलिक इति व्याख्यातम्। सूचको राज्ञा परदोषान्वेषणपूर्वकं सम्यक् तन्निवेदने नियुक्तः। भेदकृन्मित्रादिप्रीतिभङ्गकर्त्ता। श्रेण्यादिष्वित्यस्यायमर्थः। येषु श्रेण्यादिषु यस्यैकोऽपि द्वेषवृतां शत्रुतामाप्तस्तदीयविवादे तच्छ्रेण्यादिनिविष्टाः सर्वे एव न साक्षिणस्तत्र हेतुर्द्वेष्टारः सर्वएव त इति तच्छ्रेण्यान्तर्गतैकद्वेष्यनुरोधकृतवैरनिर्यातनार्थमन्यथावादित्वसम्भवात्। अतएव नारदः “बालोऽज्ञानादसत्यात् स्त्री पापाभ्यासाच्च कूटकृत्। विब्रूयाद्बान्धवः स्नेहाद्वैरनिर्यातनादरिरिति”। कात्यायनः “तद्वृत्तिजीविनो ये च तत्सेवाहितकारिणः। तद्बन्धुसुहृदो भृत्या आप्तास्ते तु न साक्षिणः। मातृष्वसुःसुताश्चैव पितृष्वसृसुतास्तथा। मातुलस्य सुताश्चैव सोदर्यसुतमातुलाः। एते सनाभयः प्रोक्ताः साक्ष्यन्तेषु न योजयेत्। कुल्याः सम्बन्धिनश्चैव विवाह्यो भगिनीपतिः। पिता बन्धुः पितृव्यश्च श्वशुरो गुरवस्तथा”। तथा वृहस्पतिः “मातुः पिता पितृव्यश्च भार्याभ्रातृमातुलौ। भ्राता सखा च जामाता सर्ववादेष्वसाक्षिणः। परस्त्रीपानसक्ताश्च कितवाः सर्वदूषकाः। उन्मत्तार्त्ताः साहसिका नास्तिकाश्च न साक्षिणः” इति। अत्र मातृष्वस्रादिशब्दानां सम्बन्धिशब्दत्वादर्थिप्रत्यर्थिनोरन्यतरस्य एतादृशसम्बन्धिनो न साक्षिणः सम्बन्धिनि स्नेहादन्यत्र वैरसम्भवादिति ध्येयम्। शङ्खलिखितौ “शुल्कगुल्माधिकृतौ दूतो वेष्टितशिराः स्त्रियोगुरुकुलवासिनः परिव्राजकवानप्रस्थनिर्ग्रन्थाः शाङ्खिनः व्यालग्राहिणः” इति अत्राऽसाक्षिणः इति प्रकृतम् शुल्काधिकृतः शुल्कग्रहणस्थानाधिकारी। गुल्मः स्वस्थाननिवेशितः पदातिसमूहस्तदधिकृतः। वेष्टितशिराः उद्धतवेषोमूर्द्धव्याध्यभिभूतो वा इतरे प्रसिद्धा व्याख्याततराश्च। अनेन प्रपञ्चेन लोभादिकमसाक्षित्वनिमित्तमेव व्यक्तीकृतम्। यथाह मनुः “लोभान्मोहाद्भयात् क्रोधान्मैत्र्यात्कामात्तथैव च। अज्ञानाद्बालभावाच्च साक्षी वितथ उच्यत” इति।

**दुष्ठु** अव्य० दुर्+स्था—कु सुषामा० षत्वम्। १निन्दायाम् अमरः। २अविनीते त्रि० उणादिको० ततः उद्गात्रा० भावे अञ्। दौष्ठव अविनये न०।

**दुष्पतन** न० दुष्टं पतत्यनेन दुर्+पत—करणे ल्युट्। १अपशब्दे त्रिका०। अपशब्दप्रयोगस्य दुरदृष्टजनकतया पतनहेतुत्वात् तथात्वम्। “नापभाषितवै न म्लेच्छितवै म्लेच्छो ह वा नाम यदपशब्दः” इत्यादिश्रुत्या हि अपशब्दप्रयो-